समीक्षा। क्षीरतरङ्गिण्याम् 'वर्फ—' इति पठित्वा 'हिंसार्थे कण्ठः पठति' इत्युक्तम्। 'वफ—' इति काशकृत्स्नः। 'पर्प—' इति सायणः।

वर्फकः-र्फिका, वर्फकः-र्फिका, विवर्फिषकः-षिका, वावर्फकः-र्फिका ;
वर्फिता-त्री, वर्फयिता-त्री, विवर्फिषिता-त्री, वावर्फिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककर्बतिवत् (173) ज्ञेयानि।

(1566) "वर्ष स्नेहने" (I-भ्वादिः-613. अक. सेट्. आत्म.)

'............स्नेहे तु वर्षते॥' (श्लो. 176) इति देवः।
'पर्ष—' इति क्षीरस्वामी। चन्द्रकाशकृत्स्नकातन्त्रहेरम्बबोपदेवादयः न पठन्ति। शाकटायनदेवमैत्रेयसायणभट्टोजिदीक्षितादयः 'वर्ष स्नेहने' इत्यभ्युपगच्छन्ति। स्नेहनं=स्निग्धीभावः। 'पर्ष वर्ष' इति पृथक्त्वेन मैत्रेयः पठति।

वर्षकः-र्षिका, वर्षकः-र्षिका, विवर्षिषकः-षिका, वावर्षकः-र्षिका ;
वर्षिता-त्री, वर्षयिता-त्री, विवर्षिषिता-त्री, वावर्षिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिककर्बतिवत् (173) ज्ञेयानि। अवावर्ट्-[1]अवावर्ड्-वर्षौ-वर्षः, [2]प्रियवर्षी, धनवर्षी, निष्ठायाम्-वर्षितम्-तः-तवान्, इमानि रूपाणि विशेषेण भवन्ति।

(1567) "वर्ह परिभाषणहिंसाच्छादनेषु"

(I-भ्वादिः-640. सक. सेट्. आत्म.)

'—परिभाषणहिंसादानेषु' इति क्षीरस्वामिमैत्रेयद्रुमसायणादयः। '—प्राधान्यपरिभाषण....दानेषु' इति कातन्त्रे। चन्द्रकाशकृत्स्नौ न पठतः। "अत्र धनपालमैत्रेयौ परिभाषणादावोष्ठ्यादित्वम्, वृद्धौ दन्त्योष्ठ्यादित्वं चाहतुः। 'छादयत्यनेनेति वर्हः घञ्' इति वदन् शाकटायनोऽप्यत्रैवानुकूलः। यथा वयं तथा स्वामी।" इति मा. धा. वृत्तिः। 'परिभाषणमत्र वञ्चनवादः' इति धा. का. व्याख्या (1-81)।

---

1. क्विपि, 'रात् सस्य' (8-2-24) इति नियमात् न संयोगान्तलोपः।
2. ताच्छीलिके णिनिप्रत्यये रूपमेवम्।